# ।। श्रीमत्कूर्ममहापुराणम् ।।

**नारायणं नमस्मृत्य नरं चैव नरेत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।।**

विद्वान्. बिदरहल्लीत्युपाह्वयः कृष्णाचार्यः

## प्रथमोभागः

### प्रथमोऽध्यायः

इन्द्रद्युम्नो मोक्षमवाप —– शौनकादिभिः पृष्टः सूताचार्यः कूर्ममहापुराणं तेभ्य उपदिदेश । विष्ण्वादीनि महापुराणानि अष्टादश, एवमाद्यादीन्यष्टादशोपपुराणानि । (अष्टादशपुराणनामानि पश्यत गणनाममसु 'पुराणानि') कूर्मं पुराणमिदं षट्सहस्रग्रन्थात्मकम्, पूर्वार्धमपरार्धमिति च विभक्तम् । परं सूताचार्येण ब्राह्मी, भागवती, गौरी वैष्णवीति चतुर्धा विभक्तमिति प्रतिज्ञातम् ।

कासा देवी ?- मन्दरं मन्थानं कृत्वा देवासुराः क्षीरोधधिं ममन्थुरमृतार्थम् । मन्थाभूतो मन्दरो यदोदधौ न्यमज्यत् तदा श्रीहरिः कूर्मो भूत्वोज्जहार । तत्कर्म देवा अस्तुवन् । समुद्रान्नानापदार्थाः प्रादुरभवन् । तन्मध्ये काचित् देवी च प्रादुर्भूता । सा हरिं वव्रे । तस्याः देहकान्त्या सौन्दर्येण चेन्द्रादिदेवाः, नारदादिमुनयश्च मुमुहुः । ततो हरिमपृच्छन् का वेयं देवी ? इति । हरिरुवाच - यन्माययेदं जगत् सृष्टं, तन्मायाय अरभिमानीयम् । ममेयं प्रियतमा । अस्य जगतः सृष्टिस्थिप्ययादीनां कारणभूतामिमां परतत्त्वं मां च यो जानाति स अस्या मायायाः बन्धनात् विमुक्तो भवति । ब्रह्मादिषु याऽदद्भुता शक्तिरस्ति सा शक्तिरस्या अनुग्रहलेशादेव । समस्तजगत्प्रसवित्रीयं देवी मया श्रीकल्यपे सृष्टा । चतुर्भुजेषु शङ्खचक्रगदापद्मानि धत्ते । नानया अभिमन्यभूतां मायां जेतुं यः कोऽपि शक्तः । तथापि प्राक् बन्धनादस्मादिन्द्रद्युम्नो बहिरागतः ।

अयमिन्द्रद्युम्नः प्राक् जन्मनि विप्रोऽभूत् । रुद्रादिसकलदेवैरजेयो हरिरिति मत्वा तमेवाभजदन्यन्यभावेन । हरेः सेवनात् परस्मिन् जन्मनि राजा बभूव, परं पूर्वजन्मस्मृतिमांश्चायं इन्द्रद्युम्न इति नाम धत्त । तीव्रव्रतोपवासादिभिः ब्राह्मणसेवनादिभिः हरिमभजत । स इन्द्रद्युम्नो हरेः प्रतिमास्थानां मायां ददर्श । यस्य कस्यापि स्वां तनुं न दर्शयिष्यति सा देवीन्द्रद्युम्नाया नजग्राह , उवाच च तम् । मयि तथा हरौ न भेदः, उभावपि समनस्कौ । यो मां कर्मणाराधयति, स कर्मयोगी ममानुग्रहात् परतत्वानि विज्ञाय मोक्षमाप्नोति । तादृशं ज्ञानं ममानुग्रहात् प्राप्स्यसि । एवं तमनुगृह्य देव्यन्तर्बभूव । बहुकालानन्तरं हरेरपरोक्षमवाप इन्द्रद्युम्नः । अपरोक्षीभूतो हरिरूवाच - 'मां निरन्तरं स्मरन् स्वोचितकर्माण्याचरन्, अव्यवहितभक्तिमान्, जीवनमिदं यापय' इत्याज्ञाप्यन्तर्बभूव श्रीहरिः ।

हरेरुपासनं त्रिविधम् । नानावतारेषु हरिणा कृतानां नानालीलानामुपासनम्, व्याप्तस्य हरेरुपासनम्, हरिर्वेदैकवेद्य इत्युपासनमिति । इन्द्रद्युम्नस्तु स्वशक्त्यानुसारेण त्रिविधादप्युपससार हरिम् ।

चतुश्चत्वरिंशोऽध्यायः

पुराणपरिसमाप्तिः — चतुर्मुखस्यायुषि परार्धावसाने प्राकृतो लय आरब्धो भवति । लोकदाहकः कालग्निः देवासुरगन्धर्वनरादिसकलजीवसहितं ब्रह्माण्डं भस्मीकरिष्यति । महादेवस्तु लोकसंहारकरूपं धत्ते । कालाग्निं विशति, सूर्यमण्डलं विशति । एवं नानारूपाणि धृत्वा सकलजगद्धक्ष्यति । ब्रह्मशिवास्त्रं देवशरीराणि धक्ष्यति । तदैका गिरिजा तत्काले साक्षीभूता तिष्ठति । देवतानां शिरसां कपालैराभरणानि विरचय्य स सहस्रनेत्रैः सहस्रकिरणैर्युक्तो महादेवा भयकृद्रूपाद्विराजते । शूली सः तदा नृत्यति । ततो महादेवो ज्योतिर्रूपं धत्ते । भूमिर्जले, जलं चाग्नौ, अग्निश्च वायौ, वायुराकाशे, आकाशश्च तामसाहङ्कारे, इन्द्रियाणि तैजसाहङ्कारे, देवास्तु सात्विकाहङ्कारे लीनाः भवन्ति ।

त्रीण्यहङ्काराणि महति, महच्च प्रकृत्यां लीनं भवति । प्रधानपुरुषौ न लीनौ भवतः । गुणसाम्यावस्थां प्रकृत्याः लयमिति, गुणवैषम्यं सृष्टिरिति विजानीयात् । एतादृशलयं ब्रह्मा करोति हिरण्यगर्भश्चतुर्मुखस्तु सदसदात्मकं चतुर्विंशतितत्त्वात्मकं जगन् निर्माति । अग्निनारायणेन्द्र-ब्रह्मादिनानानामभिर्व्यवहार्यो देव एक एव । एवं परब्रह्मणो ननाव्यापारान् कूर्मरूपिणः हरेः सकाशात् श्रुत्वः मुनयः हरिं स्तुत्वा स्वाश्रमं जग्मुः । ततः सूताचार्यः पुराणेऽस्मिन् उपदिष्टसकल-विषयाणामनुक्रमणिकामुपदिदेश शौनकादिभ्यः । पुराणागतिक्रमस्तु- नारायणात् नारदः, नारादाद् गौतमः, गौतमात् पराशरोऽवाप । पराशरस्तु नानामुनिभ्य उपदिदेश । चतुर्मुखात् सनत्कुमारः सनत्कुमारात् व्यासः, व्यासात् सूताचार्यः, सूताच्छौनकादयः प्राप्नुवन् ।

समाप्तमिमं कूर्मं महापुराणम्